# Shri Kedara Kavacham

# શ્રીકેદારકવચમ્

## Document Information

Text title : Kedara Kavacham

File name : kedArakavacham.itx

Category : shiva, kavacha

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : padmapurANe karavIrakhaNDe

Latest update : September 30, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 6, 2023

*sanskritdocuments.org*

Shri Kedara Kavacham

# શ્રીકેદારકવચમ્

શ્રીગણેશાય નમઃ ।
શ્રીરવલનાથાય નમઃ ।
અસ્ય શ્રીરવલનાથકવચસ્તોત્રમન્ત્રસ્ય,
બ્રહ્મણે ઋષયે નમઃ । શિરસિ ।
અનુષ્ટુપ્ છન્દસે નમઃ । મુખે ।
શ્રીરવલનાથાય નમઃ । હૃદયે ।
રં બીજાય નમઃ । ગુહ્યે ।
વં શક્તયે નમઃ । પાદયોઃ ।
લં કીલકાય નમઃ । સર્વાઙ્ગે ।
શ્રીરવલનાથપ્રીત્યર્થે જપે વિનિયોગઃ ॥

અથ ધ્યાનમ્ ।
કેયૂરાદિવિભૂષિતૈઃ કરતલૈરત્નાઙ્કિતૈઃ સુન્દરં
 નાનાહારવિચિત્રપન્નગયુતૈર્હેમામ્બરૈર્મણ્ડિતમ્ ।
હસ્તાભ્યાં ધૃતખડ્ગપાત્રડમરુશૂલં સદા બિભ્રતં
 વાજીવાહનદૈત્યદર્પદલનં કેદારમીશં ભજે ॥

અથ કવચમ્ ।
ૐ કેદારઃ પૂર્વતઃ પાતુ ચાગ્નેય્યાં રવલેશ્વરઃ ।
દક્ષિણે વારિજાક્ષસ્તુ નૈરૃત્યાં રક્ષસૂદનઃ ॥ ૧॥

પશ્ચિમે પન્નગેશશ્ચ વાયવ્યાં દૈત્યનાશકઃ ।
ઉત્તરે ઉત્તરેશશ્ચ ઈશાન્યાં ઈશ એવ ચ ॥ ૨॥

ઊર્ધ્વં ગઙ્ગાધરઃ પાતુ ધરાયાઞ્ચ ત્રિવિક્રમઃ ।
એવં દશદિશોન્યસ્ય પશ્ચાદઙ્ગેષુ વિન્યસેત્ ॥ ૩॥

શિખાયાં રેણુકાનાથો મસ્તકે ભાલલોચનઃ ।
ભાલં મે રક્ષ ભગવન્ ભ્રૂમધ્યે મેદિનીપતિઃ ॥ ૪॥

નેત્રયોર્જ્યોતિનાથશ્ચ કર્ણયોઃ કીર્તિવર્ધનઃ ।
કુણ્ડલીનાઃ કપોલૌચ નાસિકાં વિઘ્નનાશનઃ ॥ ૫॥

ઓષ્ઠદ્વયો ઉમાનાથો દન્તયોર્ધરણીધરઃ ।
જિહ્વાયાં વેદજિહ્વશ્ચ હનુશ્ચહનુમત્પ્રિયઃ ॥ ૬॥

ગ્રીવાયાં નીલકણ્ઠશ્ચ સ્કન્ધૌસ્કન્દ પ્રિયઙ્કરઃ ।
બાહોઃ શસ્ત્રભૃતાં શ્રેષ્ઠો હસ્તેડમરૂધારકઃ ॥ ૭॥

હૃદયં વિશ્વનાથશ્ચ ઉદરં મે જનપ્રિયઃ ।
નાભિં પાતુ ગુહાવાસો કટિમધ્યે કપાલભૃત્ ॥ ૮॥

ગુહ્યેગુહ્ય નિવાસશ્ચ ઉરૂભ્યાં ઉક્ષવાહનઃ ।
જાન્વોર્જહ્નુ સુતાધારી જઙ્ઘયોર્જઙ્ગનોદ્ભલીન્ ॥ ૯॥

ગુલ્ફયોઃ ગૂઢકર્તાત્મા પાદયોઃ પદવન્દિતઃ ।
નખેષુ રોમકૂપેષુ વ્યાપકઃ સર્વસન્ધિષુ ॥ ૧૦॥

અગ્રતઃ પાતુ મે ખડ્ગી પૃષ્ઠતઃ પાતુ શૂલવાન્ ।
પાતુમાં પાત્રધારીચ વાતપિત્તકફાદિષુ ॥ ૧૧॥

જલે જલધરઃ પાતુ સ્થલે સ્થાણુઃ સનાતનઃ ।
મહાર્ણવે મહાદુર્ગે અગ્નિ ચોરભયેષુ ચ ॥ ૧૨॥

શસ્ત્રક્ષતેષુ યો રક્ષેદ્ રત્નાસુરનિબર્હણઃ ।
સુપ્તિ પ્રમાદ વિપદૈ રક્ષમાં ગિરિવાસકઃ ॥ ૧૩॥ (વિષદૈ રક્ષેન્માં)

ય ઇદં કવચં દિવ્યં કેદારસ્ય મહાત્મનઃ ।
પઠન્તિ શ ૃણ્વતે વાણી સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૪॥

ઇતિ શ્રીપદ્મપુરાણે કરવીરખણ્ડે કેદારકવચં સમ્પૂર્ણમ્ ॥

શ્રીનાથચરણાર્પણમસ્તુ ।
॥ શુભં ભવતુ ॥

Although it is mentioned in colophone that
the stotra is in Padmapurana, the
location is not traceable in the printed book.

Proofread by Aruna Narayanan

*Shri Kedara Kavacham*

pdf was typeset on October 6, 2023

Please send corrections to *sanskrit@cheerful.com*